सुजनता सज्जनता ऐश्वर्यस्य ऐश्वर्य का विभूषणं भूषण है, वाक्संयमः वाणी पर संयम रखना-कम बोलना शौर्यस्य शूरता का (भूषण है), उपशमः शान्ति ज्ञानस्य ज्ञान का भूषण है, विनयः विनय कुलस्य कुल का भूषण है, पात्रे सत्पात्र में तथा सत्कार्य में व्ययः व्यय करना वित्तस्य धन का भूषण है, अक्रोधः क्रोध न करना तपसः तपस्या का भूषण है, क्षमा क्षमा बलवतां बलवानों का भूषण है तथा निर्व्याजता निष्कपट व्यवहार धर्मस्य धर्म का भूषण है, (परन्तु) इदं यह शीलं शील (उपर्युक्त) सर्वेषाम् अपि सभी भूषणों का सर्वप्रधान कारण (तथा) परं सबसे उत्कृष्ट भूषणं भूषण है।

सप्तमी विभक्ति

बन्धु कौन है ?

उत्सवे व्यसने चैव, दुर्भिक्षे शत्रुविग्रहे।
राजद्वारे श्मशाने च, यस्तिष्ठति[5] स बान्धवः ॥७४॥

—चाणक्यशतकम्।

सन्धि—१—ज्ञानस्य + उपशमः। २—अक्रोधः + तपसः। ३—सर्वेषाम् + अपि। ४—सर्व + कारणम् + इदम्। ५—यः + तिष्ठति।

यः जो मनुष्य उत्सवे उत्सव में, व्यसने व्यसन में, चैव और दुर्भिक्षे अकाल में (तथा) शत्रुविग्रहे शत्रुओं के साथ लड़ाई में, राजद्वारे राज दरबार में च तथा श्मशाने श्मशान में तिष्ठति रहता है स वह बान्धवः भाई-बन्धु है।

शील सर्वत्र के लिये सहायक धन है

विदेशेषु धनं विद्या, व्यसनेषु धनं मतिः।
परलोके धनं धर्मः, शीलं सर्वत्र वै धनम् ॥७५॥

—सुभाषितरत्नभाण्डागारः

विदेशेषु विदेशों में विद्या विद्या धनं धन होता है, व्यसनेषु आपत्ति काल में मतिः बुद्धि धनं धन होता है। परलोके परलोक में धर्मः धर्म धनं धन होता है और शीलं शील सर्वत्र सब जगह के लिए धनं धन होता है।

प्रथमे नाऽर्जिता[1] विद्या, द्वितीये नाऽर्जितं[2] धनम्।
तृतीये नार्जितं पुण्यं, चतुर्थे किं करिष्यति ॥७६॥

—चाणक्यशतकम्

प्रथमे प्रथम अवस्था में विद्या विद्या न अर्जिता नहीं कमायी गयी, द्वितीये द्वितीय अवस्था में धनं धन न अर्जितं नहीं कमाया गया, तृतीये तृतीय अवस्था में पुण्यं पुण्य न अर्जितं नहीं कमाया गया, (तो फिर) चतुर्थे चतुर्थ अवस्था में—अर्थात् बुढ़ापे में किं क्या करिष्यति करेगा?

उत्तम वस्तुयें सब जगह नहीं होतीं

शैले शैले न माणिक्यं, मौक्तिकं न गजे गजे।
साधवो नहि सर्वत्र, चन्दनं न वने वने ॥७७॥

—चाणक्यशतकम्

शैले शैले प्रत्येक पर्वत पर माणिक्यं न माणिक्य नहीं होता, गजे

सन्धि—१—न + अर्जिता २—न + अर्जितम्।

गजे प्रत्येक हाथी पर **मौक्तिकं न** मोती नहीं होता, **सर्वत्र** सब जगह **साधवः न** सज्जन पुरुष नहीं होते (तथा) **वने वने** प्रत्येक वन में **चन्दनं न** चन्दन नहीं होता।

कहाँ कहाँ लज्जा नहीं रखनी चाहिये ?

धन-धान्य-प्रयोगेषु, विद्या-संग्रहणे तथा।
आहारे-व्यवहारे च, त्यक्तलज्जः सुखी भवेत् ॥ ७८ ॥

—चाणक्यनीतिः

धन-धान्य-प्रयोगेषु रुपया पैसा तथा अन्न के देन लेन में **तथा** तथा **विद्या-संग्रहणे** विद्या के संग्रह में, **आहारे** भोजन में **च** और **व्यवहारे** व्यवहार में **त्यक्तलज्जः** लज्जा न रखने वाला मनुष्य **सुखी** सुखी **भवेत्** होता है।

यह पण्डित की परिभाषा है

मातृवत् परदारेषु, परद्रव्येषु लोष्टवत्।
आत्मवत् सर्वभूतेषु, यः पश्यति स पण्डितः ॥ ७६ ॥

—चाणक्यशतकम्

यः जो मनुष्य **परदारेषु** दूसरों की स्त्रियों में **मातृवत्** माता के समान, **परद्रव्येषु** दूसरों के धन में **लोष्टवत्** ढेले के समान तथा **सर्वभूतेषु** सब प्राणियों में **आत्मवत्** अपनी आत्मा के समान **पश्यति** दृष्टि रखता है—व्यवहार रखता है **स** वह **पण्डितः** पण्डित, विद्वान् है।

पूर्वजन्म के पुण्य मनुष्य को संकट से बचाते हैं ?

वने रणे शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा।
सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि ॥८०॥

—नीतिशतकम् ९८

वने वन में, **रणे** युद्ध में, **शत्रुजलाग्निमध्ये** शत्रु, जल और आग के बीच में, **महार्णवे** महासमुद्र में (अथवा) **पर्वतमस्तके** पर्वत के शिखर पर,

सुप्तं सोये हुए को, **प्रमत्तं** असावधान को, **वा** अथवा **विषमस्थितं** विषम भूमि अथवा विषम अवस्था में वर्तमान (पुरुष) को **पुराकृतानि** पूर्व जन्म के किये हुए **पुण्यानि** पुण्य **रक्षन्ति** बचाते हैं—उनकी रक्षा करते हैं।

समझदार व्यक्ति सबसे अधिक प्रिय होता है

न भ्रातरि न च मातरि, न च नेतरि नापि पितरि न स्वसरि।
न च दातरि न च गातरि, सा प्रीतिर्या च बोद्धरि नरि स्यात् ॥ ८१ ॥
—कथारत्नाकरः

या जो, **प्रीतिः** प्रेम **बोद्धरि** समझने वाले अर्थात् अच्छी समझ-बूझ रखने वाले, **नरि** मनुष्य में, **स्यात्** होता है, **सा** वह **न भ्रातरि** न भाई में, **न मातरि** न माता में, **न नेतरि** न नेता में, **न पितरि अपि** न पिता में भी, **न स्वसरि** न बहन में, **न दातरि** न दानी में, **च** तथा **न गातरि** न गाने वाले में होता है।

ये ही लोग वस्तुतः पुरुष हैं

सुधीः शास्त्रे बली युद्धे, वाग्मी दौत्ये क्षमी तपे।
दानी वित्ते दृढः कृत्ये, वशी गेहे पुमान् पुमान् ॥८२॥

(जो पुरुष) **शास्त्रे** शास्त्र में **सुधीः** विद्वान् होता है, **युद्धे** युद्ध में **बली** बलवान् होता है, **दौत्ये** दूत का काम करने में **वाग्मी** सुन्दर वक्ता होता है, **तपे** तपस्या में **क्षमी** क्षमाशील होता है, **वित्ते** धन होने पर **दानी** दानी है, **कृत्ये** काम में **दृढः** अचल रहता है तथा **गेहे** घर में **वशी** जितेन्द्रिय होता है (वास्तव में वही) **पुमान्** पुरुष **पुमान्** पुरुष है।

इन पाँच बातों से पुरुष पुरुष कहलाता है

पात्रे त्यागी गुणे रागी, भोगी परजनैः सह।
शास्त्रे बोद्धा रणे योद्धा, पञ्चाङ्गः पुरुषः स्मृतः ॥८३॥
—उपदेशतरङ्गिणी १, ६८.

पात्रे सत्पात्र में **त्यागी** दान करनेवाला, **गुणे** गुण में **रागी** अनुराग रखने-

वाला, **परजनैः सह** दूसरे लोगों के साथ **भोगी** धन का उपभोग करनेवाला, **शास्त्रे** शास्त्र में **बोद्धा** बोध रखनेवाला अर्थात् शास्त्र को समझनेवाला (तथा) **रणे** संग्राम में **योद्धा** लड़नेवाला, (इस प्रकार) **पञ्चाङ्गः** इन पाँच अङ्गों से—गुणों से युक्त पुरुष **पुरुषः** पुरुष **स्मृतः** कहा जाता है ।

किसकी कहाँ परीक्षा होती है ?

आपदि मित्रपरीक्षा, शूरपरीक्षा रणाङ्गणे भवति ।
विनये वंशपरीक्षा, स्त्रियः परीक्षा तु निर्धने पुंसि ॥८४॥

सुभाषित रत्नभाण्डागारः

आपदि आपत्ति के समय में **मित्रपरीक्षा** मित्र की परीक्षा (होती है), **रणाङ्गणे** युद्ध के मैदान में **शूरपरीक्षा** वीर की परीक्षा (होती है), **विनये** विनय में, चाल-चलन में **वंश-परीक्षा** कुल की परीक्षा (होती है) तथा **पुंसि** पुरुष के **निर्धने** गरीब हो जाने पर **स्त्रियः** स्त्री की **परीक्षा** परीक्षा होती है ।

मरने के बाद मनुष्य क्या लेकर जाता है ?

धनानि भूमौ पशवश्च[1] गोष्ठे, नारी गृहद्वारि जनाः श्मशाने ।
देहश्चितायां[2] परलोकमार्गे, कर्मानुगो गच्छति जीव एकः ॥८५॥

धनानि धन **भूमौ** जमीन पर (रह जाता है), **पशवः** पशु **गोष्ठे** गोशाला में (रह जाते हैं), **नारी** स्त्री **गृहद्वारि** घर के दरवाजे पर (रह जाती है), **जनाः** मनुष्य—भाई-बन्धु आदि **श्मशाने** श्मशान तक ही (रह जाते हैं) **च** और **देह** शरीर **चितायां** चिता पर ही (समाप्त हो जाता है) परन्तु **परलोकमार्गे** परलोक के रास्ते में **एकः** अकेला **जीवः** जीव ही **कर्मानुगः** अपने पाप पुण्य कर्मों को लेकर **गच्छति** जाता है ।

सन्धि—१—पशवः + च । २—देहः + चितायाम् ।

गृहस्थाश्रम के छ दुःख

कुले कलङ्कः कवले कदन्नता, सुतः कुबुद्धिर्भवने[1] दरिद्रता ।
रुजः शरीरे कलहप्रिया प्रिया, गृहाश्रमे दुर्गतयः षडेताः[2] ॥८६॥

सुभाषितरत्नभाण्डागारः

कुले कुल में **कलङ्कः** कलंक, **कवले** भोजन में **कदन्नता** खराब अन्न, **कुबुद्धिः** मूर्ख **सुतः** पुत्र, **भवने** घर में **दरिद्रता** दरिद्रता, **शरीरे** शरीर में **रुजः** बीमारियाँ (तथा) **कलहप्रिया** झगड़ालू **प्रिया** स्त्री **एते** ये **षट्** छः **गृहाश्रमे** गृहस्थाश्रम में **दुर्गतयः** दुर्गतियाँ हैं, दोषहैं ।

इन नव गुणों से युक्त मनुष्यों को नमस्कार है

वाञ्छा सज्जनसंगमे परगुणे, प्रीतिर्गुरौ[3] नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्[4] भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने[5], संसर्गमुक्तिः खले-
ष्वेते[6] यत्र वसन्ति निर्मलगुणास्तेभ्यो[7] नरेभ्यो नमः ॥८७॥

—नीतिशतकम् ६२

सज्जनसंगमे सज्जन पुरुषों के समागम की **वाञ्छा** इच्छा, **परगुणे** दूसरों के गुण में **प्रीतिः** प्रेम, **गुरौ** गुरु में **नम्रता** नम्रता, **विद्यायां** विद्या में **व्यसनं** विशेष आसक्ति, **स्वयोषिति** अपनी स्त्री में **रतिः** अनुराग, **लोकापवादात्** लोकनिन्दा से **भयं** भय, **शूलिनि** शंकर में **भक्तिः** भक्ति, **आत्मदमने** अपने को वश में रखने की **शक्तिः** शक्ति, **खलेषु** दुर्जनों के **संसर्गमुक्तिः** संसर्ग से दूर रहना **एते** ये **निर्मलगुणाः** निर्मल गुण **यत्र** जिन लोगों में **वसन्ति** रहते हैं **तेभ्यः** उन **नरेभ्यः** मनुष्यों के लिये **नमः** नमस्कार है ।

सन्धि—१ कुबुद्धिः+भवने । २—षट्+एताः । ३—प्रीतिः+गुरौ । ४—रतिः+लोकापवादात् । ५—शक्तिः+आत्मदमने । ६—खलेषु+एते । ७—निर्मलगुणाः+तेभ्यः ।

सर्वनाम प्रकरणम्

सदा ध्यान में रखने योग्य बातें

कः कालः कानि मित्राणि, को देशः कौ व्ययागमौ[1] ।
कश्चाहं[2] का च मे शक्तिः, इति चिन्त्यं मुहुर्मुहुः[3] ॥८८॥

कः कैसा कालः समय है, कानि कौन मित्राणि मित्र हैं, कः कैसा देशः देश है, कौ कितना व्ययाऽगमौ व्यय और आय है, च और अहं मैं कः कौन हूँ च तथा मे मेरी शक्तिः शक्ति का क्या है इति यह मुहुर्मुहुः बार बार चिन्त्यं सोचते रहना चाहिये ।

सभा में वृद्धों का होना आवश्यक

न सा सभा यत्र न सन्ति वृद्धाः,
वृद्धा न ते ये न वदन्ति धर्मम् ।
धर्मः स नो यत्र न सत्यमस्ति[4],
सत्यं न तत् यत् छलनाऽनुविद्धम्[5] ॥८९॥

सा वह सभा न सभा नहीं यत्र जिसमें वृद्धाः वृद्ध न सन्ति न हों, ते वे वृद्धाः न वृद्ध नहीं ये जो धर्मं उचित बात न वदन्ति न बोलते हों, स वह धर्मः न धर्म नहीं यत्र जिसमें सत्यं सचाई न अस्ति न हो (तथा) तत् वह सत्यं न सचाई नहीं यत् जो छलनाऽनुविद्धम् छल-कपट से युक्त हो ।

सा भार्या या प्रियं ब्रूते, स पुत्रो यत्र निर्वृतिः ।
तन्मित्रं[6] यत्र विश्वासः, स देशो यत्र जीव्यते ॥९०॥

—सुभाषित रत्नभाण्डागारः

सा वही भार्या स्त्री है या जो प्रियं प्रिय ब्रूते बोलती हो, स वही पुत्रः पुत्र है यत्र जिसमें निर्वृतिः विश्राम मिले, तत् वही मित्रं मित्र है यत्र जिस पर विश्वासः विश्वास हो (तथा) स वही देशः देश है यत्र जहाँ जीव्यते जीविका चले ।

सन्धि—१—व्यय + आगमौ । २—कः + च + अहम् । ३—मुहुः + मुहुः । ४—सत्यम् + अस्ति । ५—छलेन + अनुविद्धम् । ६—तत् + मित्रम् ।

उस अद्भुत शक्ति को नमस्कार

केयं[1] कस्य कुतः केन, कस्मै किं प्रति कुत्र वा।
कथं कदेत्यनिर्णीता,[2] तां वन्दे शक्तिमद्भुताम्[3] ॥६१॥

—विश्वशक्तिपराक्रमः ३.

इयं यह का कौन है, कस्य किसकी है, कुतः कहाँ से, केन किसके द्वारा, कस्मै किसके लिये, किं प्रति किसके प्रति, कथं कैसे, कदा कब (उत्पन्न हुई है) इति इस प्रकार जो अनिर्णीता निश्चित रूप से न जानी जा सकी है तां उस अद्भुतां अद्भुत शक्तिम् शक्ति की वन्दे वन्दना करता हूँ।

समानता में ही सम्बन्ध

ययोरेव[4] समं वित्तं, ययोरेव[5] समं कुलम्।
तयोर्मैत्री[6] विवाहश्च[7], न तु पुष्ट-विपुष्टयोः ॥६२॥

—पञ्चतन्त्रम् १, २२५.

ययोः जिन लोगों का समं समान एव ही वित्तं धन होता है, ययोः जिन लोगों का समं समान एव ही कुलं कुल होता है तयोः उन्हीं लोगों में मैत्री मित्रता च तथा विवाहः विवाह करना (उचित होता है) न तु न कि पुष्ट-विपुष्टयोः सबल और दुर्बल में।

कुछ असम्भव बातें

अचला कमला कस्य, कस्य मित्रं महीपतिः।
शरीरं च स्थिरं कस्य, कस्य वश्या वराङ्गना ॥६३॥

सुभाषितरत्नभाण्डागारः

कस्य किसकी कमला लक्ष्मी अचला अचल (होती है), महीपतिः राजा कस्य किसका मित्रं मित्र होता है, कस्य किसका शरीरं शरीर स्थिरं स्थिर होता है च तथा वराङ्गना वेश्या कस्य किसके वश्या वश में होती है?

सन्धि—१—का + इयम्। २—कदा + इति + अनिर्णीता। ३—शक्तिम् + अद्भुताम्। ४—५—ययोः + एव। ६—तयोः + मैत्री। ७—विवाहः + च।

न कश्चित् कस्यचिन्मित्रं[1], न कश्चित् कस्यचिद् रिपुः ।
स्वभावादेव[2] जायन्ते, मित्राणि रिपवस्तथा[3] ॥६४॥

हितोपदेश १,७३

न कश्चित् न कोई **कस्यचित्** किसीका **मित्रं** मित्र है, **न कश्चित्** न कोई **कस्यचित्** किसीका **रिपुः** शत्रु है। **मित्राणि** मित्र **तथा** तथा **रिपवः** शत्रु **स्वभावात्** स्वभाव के कारण एव ही **जायन्ते** उत्पन्न हुआ करते हैं।

मित्र-मिलन का महत्त्व

यस्य मित्रेण संभाषा, यस्य मित्रेण संस्थितिः ।
मित्रेण सह यो भुङ्क्ते, ततो नास्तीह[4] पुण्यवान् ॥६५॥

मित्रेण मित्र के साथ **यस्य** जिसकी **संभाषा** बातचीत हो, **मित्रेण** मित्र के साथ **यस्य** जिसका **संस्थितिः** सहवास हो, **मित्रेण सह** मित्र के साथ **यः** जो **भुङ्क्ते** भोजन करता है **ततः** उससे (बढ़कर) **इह** इस संसार में (कोई) **पुण्यवान्** पुण्यवान् **नास्ति** नहीं है।

जैसे के साथ तैसा व्यवहार

यस्मिन् यथा वर्तते यो मनुष्यः, तस्मिन् तथा वर्तितव्यं स धर्मः ।
मायाचारो मायया वारणीयः, साध्वाचारः साधुना प्रत्युपेयः ॥६६॥

—महाभारतम्

यः जो **मनुष्यः** मनुष्य **यस्मिन्** जिसके विषय में अर्थात् जिसके साथ **यथा** जैसा **वर्तते** व्यवहार करता है **तस्मिन्** उसके विषय में अर्थात् उसके साथ **तथा** वैसा ही **वर्तितव्यं** व्यवहार करना चाहिये **स** यह **धर्मः** धर्म (है)। **मायाचारः** कपटपूर्ण व्यवहार **मायया** कपट से ही **वारणीयः** रोकना चाहिये (तथा) **साध्वाचारः** साधुतापूर्ण व्यवहार **साधुना** साधुतापूर्ण व्यवहार से **प्रत्युपेयः** उत्तरित होना चाहिये।

सन्धि—१—कस्यचित् + मित्रम् । २—स्वभावात् + एव । ३—रिपवः + तथा । ४—न + अस्ति + इह ।

विशेष्य विशेषण प्रकरणम्

किसका जीवन सफल है ?

वाणी रसवती यस्य, भार्या पुत्रवती सती ।
लक्ष्मीर्दानवती[1] यस्य, सफलं तस्य जीवितम् ॥६७॥

—उपदेशतरङ्गिणी २, ८७.

यस्य जिस पुरुष की **वाणी** बोली **रसवती** रसभरी (होती है), **भार्या** स्त्री **पुत्रवती** पुत्रवाली (और) **सती** पतिव्रता (होती है) (तथा) **यस्य** जिसकी **लक्ष्मीः** सम्पत्ति **दानवती** दानयुक्त (होती है) **तस्य** उस पुरुष का **जीवितं** जीवन **सफलं** सफल (होता है) ।

इन तीनों की अपूर्व शोभा होती है

शीलभारवती कान्ता, पुष्पभारवती लता ।
अर्थभारवती वाणी, भजते कामपि[2] श्रियम् ॥६८॥

—सुभाषितरत्नभाण्डागारः

शीलभारवती शील के भार से झुकी हुई **कान्ता** स्त्री, **पुष्पभारवती** फूल के भार से लदी हुई **लता** लता (तथा) **अर्थभारवती** अर्थ के भार से संयुक्त **वाणी** वाणी (यह तीनों) **कामपि** किसी (अपूर्व) **श्रियं** शोभा को **भजते** धारण करती हैं ।

ये अनुरक्त पुरुष के लक्षण हैं

मुखं प्रसन्नं विमला च दृष्टिः, कथाऽनुरागो मधुरा च वाणी ।
स्नेहोऽधिकः[3] सम्भ्रमदर्शनं च, सदाऽनुरक्तस्य[4] जनस्य चिह्नम् ॥६९॥

—हितोपदेश १, ११३.

प्रसन्नं प्रसन्न **मुखं** मुख, **च** और **विमला** विमल **दृष्टिः** दृष्टि, **कथाऽनुरागः**

सन्धि—१—लक्ष्मीः + दानवती । २—कामू + अपि । ३—स्नेहः + अधिकः । ४—सदा + अनुरक्तस्य ।

बातचीत करने में अनुराग च और मधुरा मधुर वाणी वाणी, अधिकः अधिक स्नेहः स्नेह च तथा सम्भ्रमदर्शनं आदर से देखना (यह) सदाऽनुरक्तस्य सदा अनुरक्त रहनेवाले जनस्य मनुष्य का चिह्नं चिह्न है ।

ये पाँच दुःख को जड़ से नष्ट कर देते हैं

वश्याः सुता वित्तकरी च विद्या, धर्म्या कथा सज्जन-सङ्गतिश्च ।
इष्टा च भार्या वशवर्तिनी च, दुःखस्य मूलोद्धरणानि पञ्च ॥१००॥

चाणक्यनीति ८, १७.

वश्याः वश में रहने वाले सुताः पुत्र, वित्तकरी धन देने वाली विद्या विद्या, धर्म्या धार्मिक कथा कथा, सज्जनसङ्गतिः सज्जनों की संगति, च तथा इष्टा प्रिय च और वशवर्तिनी वश में रहने वाली भार्या स्त्री (ये) पञ्च पाँच दुःखस्य दुःख का मूलोद्धरणानि मूल से विनाश करने के साधन हैं ।

ये पाँच पृथ्वी के आभूषण हैं

प्रभुर्विवेकी[1] धनवांश्च दाता, विद्वान् विरागी प्रमदा सुशीला ।
तुरङ्गमः शस्त्र-निपात-धीरो, भूमण्डलस्याऽभरणानि[2] पञ्च ॥१०१॥

—सुभाषितरत्नाकरः

विवेकी विवेकशील प्रभुः मालिक, धनवान् धनी दाता दान देने वाला, विरागी सांसारिक झंझटों से दूर रहने वाला विद्वान् विद्वान्, सुशीला सुन्दर शील-स्वभाव वाली प्रमदा स्त्री, शस्त्र-निपात-धीरः शस्त्रों के गिरने पर भी धीर रहनेवाला तुरङ्गमः घोड़ा (ये) पञ्च पाँच भूमण्डलस्य भूमण्डल के आभरणानि आभूषण हैं, शोभा हैं ।

कौन पैर पसार कर सुख से सोता है ?

स्थिरः सुहृद् भृत्यचयोऽनुकूलः,[3] स्वामी गुणज्ञः सुखितश्च देशः ।
पत्नी सती यस्य कुले न कन्या, प्रसार्य पादौ स सुखेन शेते ॥१०२॥

—चाणक्यनीति ८. ६७

सन्धि— १—प्रभुः + विवेकी । २—भूमण्डलस्य + आभरणानि । ३—भृत्यचयः + अनुकूलः ।

यस्य जिसका सुहृद् मित्र स्थिरः अटल हो, भृत्यचयः सेवक-समुदाय अनुकूलः अनुकूल हो, स्वामी मालिक गुणज्ञः गुणों का जानकार हो, देशः देश सुखितः सुखी हो, पत्नी स्त्री सती पतिव्रता हो (तथा) कुले कुल में कन्या न कन्या न हो (तो) स वह मनुष्य पादौ दोनों पैर प्रसार्य पसार कर सुखेन सुख से शेते सोता है।

कौन कौन वस्तुयें समूल नष्ट हो जाती हैं ?

पिपीलिकाऽर्जितं[1] धान्यं, मक्षिका-संचितं मधु।
लुब्धेन संचितं द्रव्यं, समूलं च विनश्यति ॥१०३॥

पिपीलिकार्जितं चीटियों द्वारा एकत्रित किया हुआ धान्यं अन्न, मक्षिका-संचितं मधुमक्खियों द्वारा इकट्ठा किया हुआ मधु मधु (तथा) लुब्धेन लोभी मनुष्य द्वारा संचितं एकत्र किया हुआ द्रव्यं द्रव्य समूलं मूल के साथ विनश्यति नष्ट हो जाता है।

किसका विनाश कैसे होता है ?

कलहान्तानि हर्म्याणि, कुवाक्यान्तं च सौहृदम्।
कुराजान्तानि राष्ट्राणि, कुकर्मान्तं यशो नृणाम् ॥१०४॥

—पञ्चतन्त्रम् ५. ६६

हर्म्याणि घर कलहान्तानि कलह से विनष्ट हो जाते हैं। सौहृदं मित्रता कुवाक्यान्तं दुर्वचन बोलने से विनष्ट हो जाती है। राष्ट्राणि राज्य कुराजान्तानि दुष्ट शासक के कारण विनष्ट हो जाते हैं (तथा) नृणां मनुष्यों का यशः यश कुकर्मान्तं कुकर्म करने से विनष्ट हो जाता है।

धन की महिमा

यस्यास्ति[2] वित्तं स नरः कुलीनः, स पण्डितः स श्रुतवान् गुणज्ञः।
स एव वक्ता स च दर्शनीयः, सर्वे गुणाः काञ्चनमाश्रयन्ति[3] ॥१०५॥

—नीतिशतकम् ४१

सन्धि—१–पिपीलिका + अर्जितं। २–यस्य + अस्ति। ३–काञ्चनम् + आश्रयन्ति।

यस्य जिसके पास **वित्तं** धन **अस्ति** है **स** वह **नरः** मनुष्य **कुलीनः** कुलीन है, **स पण्डितः** वह चतुर है, **स श्रुतवान्** वह विद्वान् है (और) **गुणज्ञः** गुणों का जानकार है, **स एव** वही **वक्ता** बोलनेवाला है, और **स** वही **दर्शनीयः** दर्शन करने योग्य है। (क्योंकि) **सर्वे** समस्त **गुणाः** गुण **काञ्चनं** धन का **आश्रयन्ति** आश्रय लेते हैं।

कौन सदा नीरोग रहता है ?

नरो हिताहार-विहार-सेवी, समीक्ष्य-कारी विषयेष्वसक्तः[1]।
दाता समः सत्यपरः क्षमावान्, आप्तोपसेवी च भवत्यरोगः[2] ॥१०६॥

—चरकसंहिता, शारी० २

हिताहार-विहार-सेवी हितकर आहार विहार का सेवन करने वाला, **समीक्ष्यकारी** सोचविचार कर काम करने वाला, **विषयेषु** विषयों में **असक्तः** आसक्त न रहने वाला, **दाता** दान देने वाला, **समः** सब पर समदृष्टि रखने वाला, **सत्यपरः** सत्य बोलने वाला, **क्षमावान्** सहनशील **च** तथा **आप्तोपसेवी** आप्त पुरुषों की सेवा-शुश्रूषा एवं साथ में रहने वाला, **नरः** मनुष्य **अरोगः** रोगहीन **भवति** होता है। अर्थात् ऐसे व्यक्ति को कभी रोग नहीं होता।

कौन अच्छा और कौन बुरा है ?

मूर्खो वरं दुश्चरितो न विद्वान्, वरं गृहस्थो न यतिः कुशीलः।
निःस्वो वरं नो धनवान् अदाता, क्लीबो वरं स्त्रीकृतभुग् न शक्तः ॥१०७॥

—पद्मानन्द महाकाव्यम् २. १४७

मूर्खः मूर्ख आदमी **वरं** अच्छा (परन्तु) **दुश्चरितः** दुश्चरित्र **विद्वान्** विद्वान् **न** अच्छा नहीं। **गृहस्थः** गृहस्थ **वरं** अच्छा (परन्तु) **कुशीलः** दुराचारी **यतिः** संन्यासी **न** अच्छा नहीं। **निःस्वः** गरीब **वरं** अच्छा परन्तु **अदाता** दानहीन **धनवान्** धनवान् **न** अच्छा नहीं। **क्लीबः** नपुंसक **वरं** अच्छा (परन्तु) **स्त्रीकृतभुग्** स्त्री के सहारे जीने वाला **शक्तः** समर्थ पुरुष **न** अच्छा नहीं।

सन्धि १—विषयेषु + असक्तः। २—भवति + अरोगः।

ये चारों मस्तक के शूल हैं

अविधेयो भृत्यजनः, शठानि मित्राण्यदायकः[1] स्वामी ।
अविनयवती च भार्या, मस्तक-शूलानि चत्वारि ॥१०८॥

—पञ्चतन्त्रम्

अविधेयः आज्ञानुसार काम न करने वाला भृत्यजनः नौकर, शठानि कपटी, दुष्ट मित्राणि मित्र, अदायकः समय पर वेतन या सहायता न देने वाला स्वामी मालिक च तथा अविनयवती विनम्र न रहने वाली, उद्दण्ड भार्या स्त्री (ये) चत्वारि चारो मस्तकशूलानि मस्तक के लिये शूल होते हैं ।

ये छः सर्वदा दुखी रहते हैं

ईर्ष्यी घृणी न सन्तुष्टः, क्रोधनो नित्यशंकितः ।
परभाग्योपजीवी[2] च, षडेते[3] नित्यदुःखिताः ॥१०९॥

—विदुरनीति ३२, ६५

ईर्ष्यी ईर्ष्या रखने वाला, घृणी घृणा करने वाला, न सन्तुष्टः सन्तुष्ट न रहने वाला क्रोधनः क्रोधी स्वभाव वाला, नित्यशंकितः बराबर सन्देह में पड़ा रहने वाला च तथा परभाग्योपजीवी दूसरे के भाग्य के भरोसे जीने वाला एते ये षट् छ आदमी नित्यदुःखिताः सदा दुखी रहते हैं ।

इससे बढ़कर हँसने लायक बात क्या होगी ?

विद्वान् संसदि पाक्षिकः परवशो, मानी दरिद्रो गृही
द्रव्याढ्यः कृपणो यतिर्वसुमना[4], वृद्धो विवाहोद्यतः ।
राजा दुस्सचिवप्रियः सुकुलजो, मूर्खः पुमान् स्त्रीजितो
वेदान्ती हतसत्क्रियः किमपरं[5], हास्यास्पदं भूतले ॥११०॥

—सुभाषितरत्नभाण्डागारः

संसदि सभा में पाक्षिकः पक्षपात करने वाला विद्वान् विद्वान्, परवशः

सन्धि—१—मित्राणि + अदायकः । २—परभाग्य + उपजीवी । ३—षट् + एते । ४—यतिः + वसुमना । ५—किम् + अपरम् ।

दूसरे के अधीन रहने वाला **मानी** मानी, **दरिद्रः** दरिद्र **गृही** गृहस्थ, **कृपणः** कृपण **धनाढ्यः** धनाढ्य, **वसुमनाः** धन की लालच रखने वाला **यतिः** साधु-संन्यासी, **विवाहोद्यतः** विवाह के लिये तैयार **वृद्धः** वृद्ध, **दुस्सचिवप्रियः** दुष्ट मन्त्रियों का प्रेमी **राजा** राजा, **सुकुलजः** अच्छे कुल में उत्पन्न हुआ **मूर्खः** मूर्ख, **स्त्रीजितः** स्त्री के वशीभूत रहने वाला **पुमान्** पुरुष (तथा) **हतसत्क्रियः** सत्कर्म से रहित **वेदान्ती** वेदान्ती (इनसे) **अपरं** दूसरी **भूतले** संसार में **हास्यास्पदं** हँसने लायक बात **किं** क्या हो सकती है ?

जो इन्हें छोड़ दें वे बुद्धिमान हैं

वैद्यं पानरतं नटं कुपठितं, स्वाध्यायहीनं द्विजं
योधं कापुरुषं हयं गतरयं, मूर्खं परिव्राजकम् ।
राजानं च कुमन्त्रिभिः परिवृतं, देशं च सोपद्रवं
भार्यां यौवनगर्वितां पररतां, मुञ्चन्ति ते पण्डिताः ॥१११॥

—सुभाषितरत्नभाण्डागारः

(जो) **पानरतं** मदिरा पीने वाले **वैद्यं** वैद्य को, **कुपठितं** कम पढ़े-लिखे **नटं** नट को, **स्वाध्यायहीनं** वेदाध्ययन से हीन **द्विजं** ब्राह्मण को, **कापुरुषं** कायर **योधं** योद्धा को, **गतरयं** तेज न चलने वाले **हयं** घोड़े को, **मूर्खं** मूर्ख **परिव्राजकं** सन्यासी को, **कुमन्त्रिभिः** दुष्ट मन्त्रियों से **परिवृतं** घिरे हुए **राजानं** राजा को, **सोपद्रवं** उपद्रव से युक्त **देशं** देश को **च** तथा **पररतां** दूसरे पुरुष में आसक्त **यौवन-गर्वितां** युवती **भार्यां** स्त्री को **मुञ्चन्ति** छोड़ देते हैं **ते** वे लोग **पण्डिताः** विद्वान् हैं—चतुर हैं।

ऐसे गृहस्थाश्रम को धन्यवाद है

सानन्दं सदनं, सुताश्च[1] सुधियः, कान्ता मनोहारिणी,
सन्मित्रं, सुधनं, स्वयोषिति रतिश्चाज्ञापराः[2] सेवकाः ।

सन्धि—१—सुताः + च । २—रतिः + च + आज्ञापराः ।

आतिथ्यं, शिवपूजनं, प्रतिदिनं, मृष्टान्नपानं गृहे
साधोः सङ्गमुपासते[1] हि सततं, धन्यो गृहस्थाश्रमः ॥११२॥

—सुभाषितरत्नभाण्डागारः

सानन्दं आनन्द से परिपूर्ण सदनं घर, सुधियः बुद्धिमान् सुताः पुत्र, मनोहारिणी सुन्दरी कान्ता स्त्री, सन्मित्रं अच्छा मित्र, सुधनं अच्छा धन, स्वयोषिति अपनी स्त्री में रतिः प्रेम, आज्ञापराः आज्ञा मानने वाले सेवकाः सेवक, आतिथ्यं अतिथिसत्कार, शिवपूजनं शिव जी की पूजा, गृहे घर में प्रतिदिनं प्रतिदिन मृष्टान्नपानं मधुर भोजन और जलपान (तथा) सततं सर्वदा साधोः साधु पुरुषों का सङ्गं सङ्ग उपासते करते हैं (इन कारणों से) गृहस्थाश्रमः धन्यः धन्य है—सबसे श्रेष्ठ आश्रम है।

ऐसे गृहस्थाश्रम को धिक्कार है

क्रोशन्तः शिशवः, सवारि सदनं, पङ्कावृतं चाङ्गणं[2]
शय्या दंशवती, च रुक्षमशनं,[3]धूमेन पूर्णं गृहम्।
भार्या निष्ठुरभाषिणी, प्रभुरपि,[4] क्रोधेन पूर्णः सदा
स्नानं शीतलवारिणा हि सततं, धिग् धिग् गृहस्थाश्रमम् ॥११३॥

—सुभाषितरत्नभाण्डागारः

क्रोशन्तः चिल्लाते हुए शिशवः लड़के, सवारि पानी लगा हुआ सदनं मकान, पङ्कावृतं कीचड़ से भरा हुआ अङ्गणं आँगन, दंशवती खटमलों से भरी हुई शय्या शय्या, रुक्षं रूखा अशनं भोजन, धूमेन धूएँ से पूर्णं भरा हुआ गृहं घर, निष्ठुरभाषिणी निष्ठुर बोलने वाली भार्या स्त्री, प्रभुः अपि मालिक भी सदा क्रोधेन क्रोध से पूर्णः पूर्ण, (तथा) सततं सर्वदा शीतलवारिणा ठण्डे जल से स्नानं स्नान (यदि ऐसी हालत हो तो ऐसे) गृहस्थाश्रमं गृहस्थाश्रम को धिक् धिक् धिक्कार है, धिक्कार है।

सन्धि—१—सङ्गम् + उपासते। २—च + अङ्गणम्। ३—रुक्षम् + अशनम्। ४—प्रभुः + अपि।

स्वार्थ ही स्नेह का प्रधान कारण है

वृक्षं क्षीणफलं त्यजन्ति विहगाः, शुष्कं सरः सारसाः,
निर्द्रव्यं पुरुषं त्यजन्ति गणिका, भ्रष्टं नृपं मंत्रिणः।
पुष्पं पर्युषितं त्यजन्ति मधुपा, दग्धं वनान्तं मृगाः,
सर्वः कार्यवशात् जनोऽभिरमते, तत् कस्य को वल्लभः ॥११४॥

—चाणक्यनीति, २६.

क्षीणफलं फलहीन वृक्षं वृक्ष को विहगाः पक्षी त्यजन्ति छोड़ देते हैं, शुष्कं सूखे हुए सरः सरोवर को सारसाः सारस पक्षी (छोड़ देते हैं), निर्द्रव्यं द्रव्यहीन पुरुषं पुरुष को गणिकाः वेश्यायें त्यजन्ति (छोड़ देती हैं), भ्रष्टं विचार-हीन नृपं राजा को मंत्रिणः मंत्री (छोड़ देते हैं), पर्युषितं बासी पुष्पं फूल को मधुपाः भ्रमर त्यजन्ति छोड़ देते हैं तथा दग्धं जले हुए वनान्तं वनभाग को मृगाः मृग (छोड़ देते हैं) तत् इसलिये सर्वः प्रत्येक जनः प्राणी कार्य-वशात् अपने मतलब से ही (किसीसे) अभिरमते प्रेम करता है। कः कौन कस्य किसका वल्लभः प्रिय है ?

मधुरता की परिभाषा

दधि मधुरं मधु मधुरं, द्राक्षा मधुरा सितापि[1] मधुरैव[2]।
तस्य तदेव[3] हि मधुरं, यस्य मनो यत्र संलगति ॥११५॥

—सुभाषितरत्नभाण्डागारः

दधि दही मधुरं मीठा (होता है), मधु मधु मधुरं मीठा (होता है), द्राक्षा दाख मधुरं मीठा (होता है) और सिता चीनी अपि भी मधुरा मीठी एव ही (होती है) (परन्तु वास्तव में) तस्य उसके लिये तदेव वही वस्तु मधुरं मीठी होती है यस्य जिसका यत्र जिसमें मनः मन संलगति लगता है।

सन्धि—१—सिता + अपि। २—मधुरा + एव। ३—तत् + एव।

तिङन्त प्रकरणम्

वर्तमानकाल (लट् लकार)

वे लोग ही संसार में उत्तम पुरुष हैं

यौवनेऽपि प्रशांता ये, ये च हृष्यन्ति याचिताः ।
वर्णिता ये च लज्जन्ति, ते नरा जगदुत्तमाः ॥११६॥

—उपदेशतरङ्गिणी १

ये जो **यौवने अपि** जवानी में भी **प्रशांताः** शान्त होते हैं, ये जो **याचिताः** याचना करने पर **हृष्यन्ति** प्रसन्न होते हैं **च** तथा **ये** जो **वर्णिताः** वर्णन करने पर **लज्जन्ति** लज्जित होते हैं **ते** वे **नराः** मनुष्य **जगदुत्तमाः** जगत में उत्तम (माने जाते हैं) ।

सज्जन पुरुष की चार विशेषतायें

सुजनः न कुप्यति एव, अथ कुप्यति अमंगलं न चिन्तयति ।
अथ चिन्तयति न जल्पति, अथ जल्पति लज्जावान् भवति ॥११७॥

—वज्जालग्गम् ३४

सुजनः सज्जन पुरुष **न कुप्यति एव** कोप ही नहीं करता है, **अथ** यदि **कुप्यति** कोप करता है (तो भी) **अमंगलं** अनिष्ट करने की बात **न चिन्तयति** नहीं सोचता है, **अथ** यदि **अमंगलं** अमंगल भी **चिन्तयति** सोचता है (तो उसे) **न जल्पति** कहता नहीं, **अथ** अगर **जल्पति** कहता है (तो) **लज्जावान् भवति** लज्जित होता है ।

ज्ञान की महिमा

तमो धुनीते कुरुते प्रकाशं, शमं विधत्ते विनिहन्ति कोपम् ।
तनोति धर्मं विधुनोति पापं, ज्ञानं न किं-किं कुरुते नराणाम् ॥११८॥

—सुभाषितरत्नसन्दोहः १८६

ज्ञान तमः अन्धकार को **धुनीते** दूर करता है, **प्रकाशं** प्रकाश को **कुरुते**

फैलाता है, शमं शान्ति को विधत्ते देता है, कोपं कोप को विनिहन्ति नष्ट कर देता है, धर्मं धर्म को तनोति बढ़ाता है, तथा पापं पाप को विधुनोति नष्ट करता है (इस प्रकार) ज्ञानं ज्ञान नराणाम् मनुष्यों का किं किं क्या क्या (लाभ) न कुरुते नहीं करता है ?

किसकी बुद्धि बढ़ती है ?

यः पठति लिखति पश्यति, परिपृच्छति पण्डितानुपाश्रयति[1] ।
तस्य दिवाकर-किरणैः, नलिनीदलमिव[2] विकाश्यते बुद्धिः ॥११६॥

यः जो मनुष्य पठति पढ़ता है, लिखति लिखता है, पश्यति, (ग्रन्थों का) अवलोकन करता है, परिपृच्छति पूछता है (तथा) पण्डितान् विद्वानों की उपाश्रयति सेवा एवं सम्पर्क में रहता है तस्य उसकी बुद्धिः बुद्धि दिवाकर-किरणैः सूर्य की किरणों से नलिनीदलं कमलिनी के किसलय के समान बराबर विकाश्यते विकसित होती रहती है ।

पण्डितजन साहस में कोई काम नहीं करते

न पण्डिताः साहसिका भवन्ति, श्रुत्वापि[3] ते संतुलयन्ति तत्त्वम् ।
तत्त्वं समादाय समाचरन्ति, स्वार्थं प्रकुर्वन्ति परस्य चार्थम्[4] ॥१२०॥
दशरूपकम् ४

पण्डिताः विद्वान पुरुष साहसिकाः बिना सोचे-विचारे तुरन्त कोई काम कर देने वाले न भवन्ति नहीं होते । ते वे श्रुत्वा अपि (किसी बात को) सुन कर भी तत्त्वम् उसकी यथार्थता को संतुलयन्ति तौलते हैं—तुलनात्मक दृष्टि से विचार करते हैं । तत्त्वं (किसी भी काम के) तत्व को समादाय लेकर, समझ कर समाचरन्ति (उसके अनुसार) काम करते हैं । स्वार्थं अपने स्वार्थ को प्रकुर्वन्ति सिद्ध करते हैं च तथा परस्य दूसरे के भी अर्थं स्वार्थ को (सिद्ध करते हैं) ।

सन्धि—१—पण्डितान् + उपाश्रयति । २—नलिनीदलम् + इव ।
३—श्रुत्वा + अपि । ४—च + अर्थम् ।

सज्जनों की विभूति

पिबन्ति नद्यः स्वयमेव[1] नाऽम्भः[2], स्वयं न खादन्ति फलानि वृक्षाः।
नाऽदन्ति[3] सस्यं खलु वारिवाहाः, परोपकाराय सतां विभूतयः ॥१२१॥

नद्यः नदियाँ स्वयमेव अपने ही आप अम्भः पानी न पिबन्ति नहीं पीती हैं। वृक्षाः वृक्ष स्वयं अपने ही फलानि फल न खादन्ति नहीं खाते हैं। वारिवाहाः बादल (स्वयं ही) सस्यं अन्न न अदन्ति नहीं खाते हैं। सतां सज्जन पुरुषों की विभूतयः विभूतियाँ, धन-सम्पत्ति परोपकाराय दूसरों के उपकार के लिये होती हैं।

विदेशभ्रमण तथा विद्वानों की सेवा का महत्त्व

यो न भ्रमति देशेषु, न च संसेवते बुधान्।
तस्य संकुचिता बुद्धिः, घृतबिन्दुरिवाऽम्भसि[4] ॥१२२॥

—उद्भटसागर ६०.

यः जो देशेषु भिन्न-भिन्न देशों में न भ्रमति भ्रमण नहीं करता है च तथा न न बुधान् विद्वानों की संसेवते सेवा करता है—सङ्गति करता है तस्य उसकी बुद्धिः बुद्धि अम्भसि पानी में घृतबिन्दुः इव घी के बिन्दु के समान संकुचिता सङ्कुचित हो जाती है।

द्रव्य की यह महिमा ?

अध्यापयन्ति शास्त्राणि, तृणीकुर्वन्ति पण्डितान्।
विस्मारयन्ति जातिं स्वां, वराटाः पञ्चपाः करे ॥१२३॥

—सुभाषितरत्नाकरः

करे हाथ में (रखी हुई) पञ्चपाः पाँच-छ वराटाः कौड़ियाँ शास्त्राणि शास्त्रों को अध्यापयन्ति पढ़ाती हैं, पण्डितान् पण्डितों को तृणीकुर्वन्ति

सन्धि—१—स्वयम् + एव। २—न + अम्भः। ३—न + अदन्ति।
४—घृतबिन्दुः + इव + अम्भसि।

तृण के समान तुच्छ समझती हैं (तथा) स्वां अपनी जातिं जाति को विस्मार यन्ति विस्मृत करा देती हैं—भुलवा देती हैं ।

मच्छड़ और खल की समानता

प्राक् पादयोः पतति खादति पृष्ठमांसं,
कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः,
सर्वं खलस्य चरितं मशकः करोति ॥१२४॥
—हितोपदेश १, ८२.

प्राक् पहले पादयोः पैरों पर पतति गिरता है, (अनन्तर) पृष्ठमांसं पीठ का मांस खादति खाता है, (फिर) कर्णे कान में शनैः धीरे-धीरे किमपि कुछ विचित्रं विचित्र कलं रौति ध्वनि करता है, (तत्पश्चात्) छिद्रं छेद निरूप्य देख कर (उसमें) अशङ्कः निःशङ्क हो सहसा सहसा प्रविशति घुस जाता है, (इस प्रकार) मशकः मच्छड़ खलस्य खल का सर्वं समस्त चरितं आचरण करोति करता है ।

प्रेम के छ लक्षण

ददाति प्रतिगृह्णाति, गुह्यमाख्याति[1] पृच्छति ।
भुङ्क्ते भोजयते चैव[2], षड्विधं प्रीतिलक्षणम् ॥१२५॥
—पञ्चतन्त्रम् ४,१०.

ददाति देता है, प्रतिगृह्णाति लेता है, गुह्यं गुप्त बातों को आख्याति कहता है, पृच्छति पूछता है, भुङ्क्ते खाता है चैव और भोजयते खिलाता है (यह) षड्विधं छ प्रकार का प्रीतिलक्षणं प्रेम का लक्षण है ।

सन्धि—१—गुह्यम् + आख्याति । २—च + एव ।

दुर्जन और सज्जन का भेद

अमृतं किरति हिमांशुः, विषमेव[1] फणी समुद्गिरति ।
गुणमेव[2] वक्ति साधुः, दोषमसाधुः[3] प्रकाशयति ॥१२६॥

—सुभाषितरत्नभाण्डागारः

हिमांशुः चन्द्रमा अमृतं अमृत किरति बरसाता है (और) फणी साँप विषं विष को एव ही समुद्गिरति उगलता है । (इसी प्रकार) साधुः सज्जन पुरुष गुणं गुण को एव ही वक्ति बखानता है और असाधुः दुर्जन पुरुष दोषं दोष को ही प्रकाशयति प्रकाशित करता है ।

आत्मा का स्वरूप

नैनं[4] छिन्दन्ति शस्त्राणि, नैनं[5] दहति पावकः ।
न चैनं[6] क्लेदयन्त्यापो[7], नशोषयति मारुतः ॥१२७॥

—गीता २–३

एनं इस (आत्मा) को शस्त्राणि शस्त्र न छिन्दन्ति नहीं काटते हैं, एनं इसको पावकः आग न दहति नहीं जलाता है, च और न एनं न इसको आपः जल क्लेदयन्ति भिगाते हैं (और) न मारुतः न वायु शोषयति सुखाता है ।

मूर्ख का लक्षण

अनाहूतः प्रविशति, अपृष्टो बहु भाषते ।
अविश्वस्ते विश्वसिति, मूढचेता नराधमः ॥१२८॥

—विदुरनीति ३३–३६

(जो) अनाहूतः बिना बुलाये प्रविशति आता है अपृष्टः बिना पूछे बहु बहुत भाषते बोलता है (तथा) अविश्वस्ते विश्वास न करने योग्य

सन्धि—१–विषम् + एव, २–गुणम् + एव, ३–दोषम् + असाधुः ।
४–५–न + एनम् , ६–च + एनम् , ७—क्लेदयन्ति + आपः ।

मनुष्य में **विश्वसिति** विश्वास करता है (वह) **नराधमः** अधम मनुष्य **मूढचेताः** मूर्ख है ।

पेट के लिये मनुष्य क्या नहीं करता ?

कर्षति वपति लुनीते, दीव्यति सीव्यति पुनाति वयते च ।
विदधाति किं न कृत्यं, जठराऽनल-शान्तये तनुमान् ॥१२६॥

—सुभाषितरत्नसन्दोहः

तनुमान् मनुष्य **जठरानल-शान्तये** पेट की आग बुझाने के लिये **कर्षति** जोतता है, **वपति** बोता है, **लुनीते** काटता है, **दीव्यति** जूआ खेलता है, **सीव्यति** सीता है, **पुनाति** सफाई करता है, **वयते** बीनता है **किं** क्या **कृत्यं** काम **न विदधाति** नही करता है ?

दुर्जन और सज्जन का भेद

शरदि न वर्षति गर्जति, वर्षति वर्षासु निःस्वनो मेघः ।
नीचो वदति न कुरुते, न वदति सुजनः करोत्येव[1] ॥१३०॥

—सुभाषितरत्नभाण्डागारः

मेघः बादल **शरदि** शरद् ऋतु में **गर्जति** गरजता है परन्तु **वर्षति न** बरसता नहीं है और **वर्षासु** वर्षा ऋतु में **निःस्वनः** गरजता नहीं परन्तु **वर्षति** बरसता ही है । (इसी प्रकार) **नीचः** नीच मनुष्य **वदति** कहता है (पर) **कुरुते न** करता नहीं है (और) **सुजनः** सज्जन पुरुष **वदति न** कहता नहीं है (पर) **करोति एव** करता ही है ।

मद्य पीने का परिणाम

हसति नृत्यति गायति वल्गति, भ्रमति धावति मूर्च्छति शोचते ।
पतति रोदिति जल्पति गद्गदं, धमति धाम्यति मद्य-मदातुरः ॥१३१॥

—सुभाषितरत्नसन्दोहः

सन्धि—१—करोति + एव ।

मद्य-मदातुरः मदिरा के मद से आकुल मनुष्य **हसति** हँसता है, **नृत्यति** नाचता है, **गायति** गाता है, **वल्गति** कूदता है, **भ्रमति** भटकता है, **धावति** दौड़ता है, **मूर्च्छति** मूर्च्छित होता है, **शोचते** सोचता है, **पतति** गिरता है, **रोदिति** रोता है, **गद्गदं** अंड बंड **जल्पति** बकता है, **धमति** कुछ बोला करता है तथा **धाम्यति** नुकसान पहुँचता है।

सज्जनों की वाणी कभी बदलती नहीं

उदयति यदि भानुः पश्चिमे दिग्विभागे,
प्रचलति यदि मेरुः शीततां याति वह्निः।
विकसति यदि पद्मं पर्वताग्रे शिलायां,
न भवति पुनरुक्तं भाषितं सज्जनानाम् ॥१३२॥

—सुभाषितरत्नभाण्डागारः

भानुः सूर्य **यदि** यदि **पश्चिमे** पश्चिम **दिग्विभागे** दिशा में **उदयति** उदय ले, **मेरुः** मेरु पर्वत **यदि** यदि **प्रचलति** हिल जाय, **वह्निः** आग **यदि** यदि **शीततां** शीतलता को **याति** प्राप्त हो जाय तथा **यदि** यदि **पद्मं** कमल **पर्वताग्रे** पर्वत के शिखर पर **शिलायां** पत्थर पर **विकसति** खिल जाय (**तथापि**) **सज्जनानां** सज्जनों का **भाषितं** वचन **पुनरुक्तं** पुनरुक्त **न भवति** नहीं होता।

सत्संग का महत्त्व

जाड्यं धियो हरति सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति पापमपाकरोति[1]।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्संगतिः कथय किं न करोति पुंसाम् ॥१३३॥

—नीतिशतकम् २३

धियः बुद्धि की **जाड्यं** जड़ता को **हरति** हटाती है, **वाचि** वाणी में **सत्यं**

सन्धि—१—पापम् + अपाकरोति।

सत्य का **सिञ्चति** सिंचन करती है, **मानोन्नतिं** मान और उन्नति को **दिशति** देती है, **पापम्** पाप को **अपाकरोति** दूर करती है, **चेतः** चित्त को **प्रसादयति** निर्मल बनाती है (तथा) **दिक्षु** सब दिशाओं में **कीर्तिं** यश को **तनोति** फैलाती है। **कथय** कहिये तो, **सत्संगतिः** सज्जन पुरुषों की संगति **पुंसां** पुरुषों का **किं** क्या (लाभ) **न करोति** नहीं करती।

तरङ्गी लोगों का कुछ ठिकाना नहीं

छायां प्रकुर्वन्ति　नमन्ति पुष्पैः,
फलानि यच्छन्ति　तटद्रुमा ये।
उन्मूल्य　तानेव[1] नदी प्रयाति,
तरङ्गिणां　क्व प्रतिपन्नमस्ति[2] ॥१३४॥

—कथारत्नाकर

ये जो **तटद्रुमाः** किनारे के वृक्ष **छायां** छाया **प्रकुर्वन्ति** करते हैं, **पुष्पैः** फूलों से **नमन्ति** प्रणाम करते हैं, तथा **फलानि** फल **यच्छन्ति** देते हैं (पर) **तान्** उन वृक्षों को **एव** ही **उन्मूल्य** उखाड़ कर **नदी** नदी **प्रयाति** बड़े वेग से बहा करती है। (यह ठीक ही है, क्योंकि) **तरङ्गिणां** तरङ्गी लोगों को **प्रतिपन्नं** उचित अनुचित का विचार **क्व** **अस्ति** कहाँ रहता है ?

शराबियों की हालत

अयुक्तं बहु भाषन्ते, यत्र कुत्रापि[3] शेरते।
नग्ना विक्षिप्य गात्राणि, बालका इव मद्यपाः ॥१३५॥

—सुभाषितरत्नभाण्डागारः

मद्यपाः मद्य पीने वाले लोग **बालकाः** बालकों के **इव** समान **बहु** बहुत **अयुक्तं** बे मतलब की बातें **भाषन्ते** बोलते हैं तथा **नग्नाः** नंगा होकर (**एवं**) **गात्राणि** अङ्गों को **विक्षिप्य** इधर-उधर फेंक कर **यत्रकुत्रापि** जहाँ कहीं भी **शेरते** सो रहते हैं।

सन्धि—१—तान् + एव २—प्रतिपन्नम् + अस्ति। ३—कुत्र + अपि।

नींद में मनुष्य कुछ नहीं जानता

न पश्यति न चाघ्राति[1], न शृणोति न भाषते ।
न च स्पर्शरसौ वेत्ति, निद्रावशगतः पुमान् ॥१३६॥

—शांतिपर्व १८७-१७

निद्रा-वश-गतः निद्रा का वशीभूत पुमान् पुरुष न पश्यति न देखता है, न आघ्राति न सूँघता है, न शृणोति न सुनता है, न भाषते न बोलता है, च और न स्पर्श-रसौ न स्पर्श और रस को वेत्ति समझता है ।

अभागे मनुष्य का काम

अमित्रं कुरुते मित्रं, मित्रं द्वेष्टि हिनस्ति च ।
शुभं वेत्त्यशुभं[2] पापं, भद्रं दैवहतो नरः ॥१३७॥

—पञ्चतन्त्रम् ३, २१६

दैवहतः हतभाग्य नरः मनुष्य अमित्रं शत्रु को मित्रं मित्र कुरुते बनाता है—मानता है, मित्रं मित्र से द्वेष्टि द्वेष करता है च तथा हिनस्ति हिंसा करता है, शुभं शुभ को अशुभं अशुभ वेत्ति समझता है (तथा) पापं पाप को, अशुभ को भद्रं अच्छा—शुभ (समझता है) ।

परदेश से घर जाने वाले पुरुष की अवस्था

गायति विहसति नृत्यति, हृदयेन धृतां प्रियां विचिन्तयति ।
सम-विषमं च न पश्यति, गृह-गमन-समुत्सुकः पुरुषः ॥१३८॥

—सुभाषितरत्नभाण्डागारः

गृह-गमन-समुत्सुकः घर जाने के लिये उत्कण्ठित पुरुषः मनुष्य गायति कभी गाता है, कभी विहसति हँसता है, कभी नृत्यति नाचता है, कभी हृदयेन हृदय में धृतां विराजमान प्रियां प्रियतमा को विचिन्तयति याद करता है च तथा सम-विषमं ऊँची-नीची जमीन को भी न पश्यति नहीं देखता है ।

सन्धि—१—च + आघ्राति । २—वेत्ति + अशुभम् ।

जीवों की उत्पत्ति और विनाश

उन्मज्जन्ति निमज्जन्ति, प्रस्फुरन्ति पतन्ति च ।
तरंगा इव तोयानाम्, इमाः[1] प्रतिदिनं प्रजाः ॥१३६॥

—योगवाशिष्ठम् उत्पत्ति० ८६, ४६

तोयानाम् पानी के तरंगाः तरंग के इव समानइमाः ये प्रजाः लोग प्रतिदिनं प्रतिदिन उन्मज्जन्ति उतराते हैं, निमज्जन्ति डूबते हैं, प्रस्फुरन्ति स्फुरित होते हैं च और पतन्ति गिरते हैं ।

गुणी की निंदा कौन करता है ?

न वेत्ति यो यस्य गुणप्रकर्षं, स तं सदा निन्दति नाऽत्र[2] चित्रम् ।
यथा किराती करि-कुम्भ-जातां, मुक्तां परित्यज्य बिभर्त्ति गुञ्जाम् ।१४०।

—सुभाषितरत्नभाण्डागारः

यः जो यस्य जिसके गुण-प्रकर्षं गुण के महत्त्व को न वेत्ति नहीं जानता है स वह तं उसकी सदा हमेशा निन्दति निन्दा करता है अत्र इसमें चित्रं न आश्चर्य की कोई बात नहीं । यथा क्योंकि किराती किरात की स्त्री करि-कुंभ-जातां हाथी के शिर से उत्पन्न मुक्तां मोती को परित्यज्य छोड़कर गुञ्जां गुंजा को बिभर्ति धारण करती है ।

द्रव्योपार्जन का महत्त्व

माता निन्दति, नाभिनन्दति[3] पिता, भ्राता न संभाषते,
भृत्यः कुप्यति, नानुगच्छति[4] सुतः, कान्ता च नाऽलिङ्गते[5] ।
अर्थ-प्रार्थना-शङ्कया न कुरुते, संभाषणं वै सुहृत्,
तस्माद् द्रव्य-मुपार्जयस्व[6] सुमते, द्रव्येण सर्वे वशाः ॥१४१॥

—सुभाषित रत्नभाण्डागार

सन्धि—१—तोयानाम् + इमाः २—न + अत्र । ३—न + अभिनन्दति, ४—न + अनुगच्छति, ५—न + आलिङ्गते, ६—द्रव्यम् + उपार्जयस्व ।

माता माता निन्दति निन्दा करती है, पिता पिता न अभिनन्दति प्रसन्न नहीं होता, भ्राता भाई न संभाषते बातें नहीं करता, भृत्यः नौकर कुप्यति कुपित हो जाता है, सुतः पुत्र न अनुगच्छति आज्ञा के अनुसार काम नहीं करता, कान्ता स्त्री न आलिङ्गते आलिंगन नहीं करती, च तथा अर्थ-प्रार्थन-शङ्कया रुपया-पैसा माँगने की शङ्का से सुहृत् मित्र सम्भाषणं बात चीत न कुरुते नहीं करता तस्मात् इसलिये सुमते ! हे भाई ! द्रव्यं धन उपार्जयस्व पैदा करो (क्यों कि) सर्वे सब लोग द्रव्येण द्रव्य से वशाः वशीभूत होते हैं।

ऐसे कुपुरुष को क्या कहा जाय, आप ही निश्चय कीजिये

नारीणां वचनेन कर्म कुरुते, दीनं वचो भाषते
नाऽऽलस्यं[1] विजहाति तिग्मकिरणे, प्रौढे समुत्तिष्ठति।
किञ्चित् क्वापि[2] न साहसं वितनुते, देहे चिरं दूयते
नो वा विन्दति पौरुषं कुपुरुषः, कोऽप्येष[3] निर्णीयताम् ॥१४२॥

—पुरुष परीक्षा, १.१३

कुपुरुषः कायर पुरुष नारीणां स्त्रियों के वचनेन कहने से कर्म काम कुरुते करता है, दीनं दीन वचः वचन भाषते बोलता है, आलस्यं आलस्य को न विजहाति नहीं छोड़ता, तिग्मकिरणे सूर्य के प्रौढे खूब उग आने पर समुत्तिष्ठति उठता है, क्वापि कहीं भी किञ्चित् कुछ साहसं साहस न वितनुते नहीं करता, गेहे घर में ही चिरं बहुत दिन तक दूयते दुखी होता रहता है (तथा) पौरुषं पुरुषार्थ न विन्दति नहीं करता। (ऐसी स्थिति में) एष यह कायर पुरुष कोऽपि कैसा है, कौन है, (इसका) निर्णीयताम् निर्णय कीजिये।

दरिद्रता के नौ भीषण दोष

शीलं शातयति श्रुतं शमयति, प्रज्ञां निहन्ति क्रमात्
दैन्यं दीपयति क्षमां क्षपयति, व्रीडां निरस्यत्यपि[4]।

सन्धि—१—न + आलस्यम्। २—क्व + अपि। ३—कः + अपि + एष। ४—निरस्यति + अपि।

तेजो जर्जरयत्यपास्यति[1] मतिं, विस्तारयत्यर्थितां[2]
दारिद्र्यं पुरुषस्य किं न कुरुते, वैरं परं भीषणम् ॥१४३॥

—उद्भटसागर २८४

शीलं शील को शातयति घटा देता है, श्रुतं ज्ञान को शमयति समाप्त कर देता है, प्रज्ञां बुद्धि को क्रमात् धीरे-धीरे निहन्ति नष्ट कर देता है, दैन्यं दीनता को दीपयति बढ़ाता है, क्षमां सहिष्णुता को क्षपयति क्षीण करता है, व्रीडाम् अपि लज्जा को भी निरस्यति दूर फेंक देता है, तेजः तेज को जर्जरयति जर्जरित कर देता है, मतिं बुद्धि को अपास्यति हटा देता है, अर्थितां माँगने के स्वभाव को विस्तारयति बढ़ाता है (इस प्रकार) दारिद्र्यं दरिद्रता पुरुषस्य पुरुष से किं क्या परं भारी भीषणं भयङ्कर वैरं बैर न कुरुते नहीं करती है ।

जिसका जो स्वभाव है वह कभी नहीं छूटता

काकः पद्मवने रतिं न कुरुते, हंसो न कूपोदके,
मूर्खः पण्डितसंगमे न रमते, दासो न सिंहासने ।
कुस्त्री सज्जन-संगमे न रमते, नीचं जनं सेवते
या यस्य प्रकृतिः स्वभाव-जनिता, केनापि[3] न त्यज्यते ॥१४४॥

—सुभाषितरत्नभाण्डागारः

काकः कौआ पद्मवने कमल के वन में रतिं प्रेम न कुरुते नहीं करता है, हंसः हंस कूपोदके कूँआ के पानी में न नहीं (प्रेम करता है), मूर्खः मूर्ख पण्डित-संगमे विद्वानों के समागम में न रमते आनन्द नहीं पाता, दासः नौकर सिंहासने सिंहासन पर न नहीं आनन्द पाता, कुस्त्री दुष्ट स्त्री सज्जनसंगमे सज्जन पुरुषों के साथ में न रमते आनन्दित नहीं होती (वह) नीचं नीच जनं पुरुष का सेवते साथ करती है (क्यों कि) यस्य जिसकी स्वभावजनिता स्वाभाविक या जैसी प्रकृतिः प्रकृति होती है (वह) केनापि किसी के भी द्वारा

सन्धि—१—जर्जरयति + अपास्यति । २—विस्तारयति + अर्थिताम् ।
३—केन + अपि ।

न त्यज्यते नहीं छोड़ी जाती। अर्थात् जिसका जैसा स्वभाव होता है वह कभी नहीं छूट सकता।

स्नेह के नौ लक्षण

स्निग्धं पश्यति सुस्मितं कथयति, स्नेहात् करेण स्पृशन्
मोक्तुं नेच्छति[1] पार्श्वतो विवृणुते, कर्तव्यमन्तर्गतम्[2]।
दोषान् संवृणुते गुणान् कथयते, नो याचिते खिद्यते
शंसामेव[3] परोक्षमाचरति[4] यत्, स्नेहस्य तल्लक्षणम्[5] ॥१४५॥

चाणक्यनीति ८, २०

स्निग्धं स्नेहभरी दृष्टि से **पश्यति** देखता है, **स्नेहात्** स्नेहपूर्वक **करेण** हाथ से **स्पृशन्** स्पर्श करता हुआ **सुस्मितं** मधुर मुस्कान के साथ **कथयति** बातें करता है, **मोक्तुं** छोड़ना **न इच्छति** नहीं चाहता है, **पार्श्वतः** बगल में—एक ओर हट कर **अन्तर्गतम्** हृदयंगत **कर्तव्यं** कर्तव्य को **विवृणुते** प्रगट करता है, **दोषान्** दोषों को **संवृणुते** छिपाता है, **गुणान्** गुणों को **कथयते** कहता है **याचिते** माँगने पर **न खिद्यते** खिन्न नहीं होता, (तथा) **परोक्षं** परोक्ष में **यत्** जो **शंसाम् एव** केवल प्रशंसा ही **आचरति** करता है **तत्** वह **स्नेहस्य** स्नेह का **लक्षणं** लक्षण है।

पण्डितों के आठ गुण

दम्भं नोद्वहते[6] न निन्दति परान्, नो भाषते निष्ठुरं,
प्रोक्तं केनचिदप्रियं[7] च सहते, क्रोधञ्च[8] नालम्बते[9]।
ज्ञात्वा शास्त्रमपि[10] प्रभूतमनिशं[11], संतिष्ठते मूकवत्,
दोषांश्छादयते[12] गुणान् वितनुते, अष्टौ[13] गुणाः पण्डिते ॥१४६॥

—उद्भटसागर ३३१

सन्धि—१—न + इच्छति। २—कर्तव्यम् + अन्तर्गतम्। ३—शंसाम् + एव। ४—परोक्षम् + आचरति। ५—तत् + लक्षणम्। ६—न + उद्वहते ७—केनचित् + अप्रियम् ८—क्रोधम् + च ९—न + आलम्बते १०—शास्त्रम् + अपि ११—प्रभूतम् + अनिशम् १२—दोषान् + छादयते १३—च + अष्टौ।

दम्भं दम्भ न उद्वहते नहीं रखता, परान् दूसरों की न निन्दति निन्दा नहीं करता, निष्ठुरं निष्ठुरता के साथ न भाषते बातें नहीं करता, केनचित् किसी के द्वारा प्रोक्तं कहे हुए अप्रियं अप्रिय वचन को सहते सहता है, क्रोधं क्रोध न आलम्बते नहीं करता, प्रभूतं बहुत अधिक शास्त्रं शास्त्र को ज्ञात्वा अपि जान कर भी मूकवत् मूक के समान अनिशं बराबर संतिष्ठते रहता है, दोषान् दोषों को छादयते छिपाता है। (तथा) गुणान् गुणों को वितनुते फैलाता है (ये) अष्टौ आठ गुणाः गुण पण्डिते पण्डित में (होते हैं)।

भीरु मनुष्य न स्त्री है न पुरुष है ?

भीरुं नाश्रयते[1] जनो न कमला, भीरोः करे वर्द्धते
भीरुं हन्त पराभवन्ति पिशुना, भीरुं हसन्ति स्त्रियः।
तर्काभास-शताकुलस्य परितः, शङ्काम्बुधौ[2] मज्जतो
भीरोः पुंस्त्वमपाकृतं[3] च विधिना, स्त्रीत्वं च नोन्मीलितम्[4] ॥१४७॥

—पुरुष परीक्षा ७–१३

जनः मनुष्य भीरुं भीरु पुरुष का न आश्रयते आश्रय नहीं लेते, कमला लक्ष्मी भीरोः भीरु के करे हाथ में न वर्द्धते नहीं बढ़ती, पिशुनाः दुष्ट लोग भीरुं भीरु पुरुष को पराभवन्ति दबा डालते है, भीरुं भीरु को स्त्रियः स्त्रियां हसन्ति हँसती हैं, तर्काभास-शताकुलस्य सैकड़ो तर्काभासों से आकुल (तथा) परितः चारो ओर शङ्काम्बुधौ शंका रूपी समुद्र में मज्जतः डूबते हुए भीरोः भीरु पुरुष के पुंस्त्वं पुरुषत्व को विधिना विधिने अपाकृतं दूर कर दिया च और स्त्रीत्वं स्त्री भाव को (भी) न नहीं उन्मीलितम् साफ साफ प्रगट किया।

सन्धि—१–न + आश्रयते २–शङ्का + अम्बुधौ ३–पुंस्त्वम् + अपाकृतम् ४–न + उन्मीलितम्।

हठ कर लेने से कौन काम सिद्ध नहीं होता ?

निर्बन्धाज्जलधिं[1] तरन्ति मनुजा, बध्नन्ति वन्यं गजं,
विद्याना मुपयान्ति[2] पारमपरं[3], भ्राम्यन्ति रज्जोरपि[4] ।
योगाभ्यास-रता जितेन्द्रियगणा, जित्वा समीरं शनैर्,
दुर्लक्ष्यं परमं पदं सुमनसः, पश्यन्ति निबन्धिनः ॥१४८॥

—पुरुषपरीक्षा ४०, १२

मनुजाः मनुष्य निर्बन्धात् निर्बन्ध से जलधिं समुद्र को तरन्ति तैर जाते हैं, वन्यं जंगली गजं हाथी को बध्नन्ति बाँध लेते है, विद्यानाम् विद्याओं के पारं पार उपयान्ति चले जाते हैं अपरं और रज्जौ अपि रस्सी पर भी भ्राम्यन्ति घूमते हैं। निर्बन्धिनः निर्बन्धी पुरुष योगाभ्यासरताः योगाऽभ्यास में लीन होकर, जितेंद्रियगणाः इन्द्रियगण को जीतकर, समीरं वायु को जित्वा जीतकर शनैः धीरे-धीरे सुमनसः देवता के भी दुर्लक्ष्यं कठिनाई से देखने योग्य परमं पदं परम पद को पश्यंति देख लेते हैं। अभिप्राय यह कि यदि कोई मनुष्य किसी कठिन से कठिन काम को करने के लिये हृदय से भिड़ जाय तो उसे अवश्य पूरा कर लेता है।

आज्ञा-आशी-आदि (लोट्)

विश्व-कल्याण-कामना

सर्वस्तरतु[5] दुर्गाणि, सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु[6], सर्वः सर्वत्र नन्दतु ॥१४९॥

विक्रमोर्वशी ५, २५

सर्वः सब लोग दुर्गाणि कठिनाइयों को तरतु पार करें। सर्वः सब लोग

सन्धि—१–निर्बन्धात् + जलधिम् । २–विद्यानाम् + उपयान्ति । ३–पारम् + अपरम् । ४–रज्जौ + अपि । ५—सर्वः तरतु । ६—कामान् + अवाप्नोतु ।

भद्राणि आनन्द-मंगल पश्यन्तु देखें। सर्वः सब लोग कामान् इच्छित वस्तुओं को आप्नोतु पावें तथा सर्वः सब लोग सर्वत्र सब जगह नन्दतु आनन्दित रहें।

विश्व-कल्याण-कामना

सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग् भवेत् ॥१५०॥

सर्वे सब लोग सुखिनः सुखी अस्तु हों, सर्वे सब लोग निरामयाः नीरोग सन्तु रहें, सर्वे सब लोग भद्राणि आत्म-कल्याण पश्यन्तु देखें (तथा) कश्चित् कोई दुःखभाग् दुखी मा भवेत् मत हो।

धीर पुरुष का लक्षण

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु,
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव[1] वा मरणमस्तु[2] युगान्तरे वा,
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥१५१॥

—नीतिशतकम् ८४

नीति-निपुणाः नीति के विद्वान् निन्दन्तु निन्दा करें यदि वा अथवा स्तुवन्तु स्तुति करें, लक्ष्मीः लक्ष्मी समाविशतु आवे वा अथवा यथेष्टं खुशी से गच्छतु चली जाय, अद्यैव आज ही मरणं मरण अस्तु हो जाय वा अथवा युगान्तरे युग के बाद हो (तथापि) धीराः धीर पुरुष न्याय्यात् न्यायोचित पथः मार्ग से पदं एक पग भी न प्रविचलन्ति विचलित नहीं होते।

सब जाय पर एक न जाय

प्राणा यान्तु श्रियो यान्तु, यातु राज्यं विनश्वरम्।
एका तु स्वमुखेनोक्ता[3], वाचा मा यातु शाश्वती ॥१५२॥

सन्धि—१—अद्य + एव, २—मरणम् + अस्तु। ३—स्वमुखेन + उक्ता।

प्राणाः प्राण यान्तु चले जाँय, श्रियः धन-सम्पत्तियाँ यान्तु चली जाँय, विनश्वरं (यह) विनश्वर राज्यं राज्य यातु चला जाय तु परन्तु स्वमुखेन अपने मुँह से उक्ता कही हुई एका एकमात्र शाश्वती सत्य वाचा वाणी मा न यातु जाय।

विना भगवत्कृपा के मुक्ति नहीं

तपन्तु तापैः प्रपतन्तु पर्वतात्,
अटन्तु तीर्थानि पठन्तु चागमान्[1]।
यजन्तु यागैः विवदन्तु[2] वादैर्,
विना[3] हरिं नैव[4] मृतिं तरन्ति ॥१५३॥

—वासुदेवरसानन्दः

(मनुष्य चाहे) तापैः विविध प्रकार के तापों से तपन्तु तप करें, पर्वतात् पर्वत से प्रपतन्तु गिरें, तीर्थानि तीर्थों में अटन्तु भ्रमण करें, आगमान् शास्त्रों को पठन्तु पढ़ें, यागैः यागों से यजन्तु यज्ञ करें (अथवा) वादैः वादों से विवदन्तु विवाद करें (तथापि) हरिं विना हरि की कृपा के विना मृतिं मत्यु को नैव नहीं तरन्ति पार करते हैं ?

विधि का विधान कहीं नहीं छोड़ता ?

नश्यतु यातु विदेशं, प्रविशतु धरणीतलं खमुत्पततु[5]।
विदिशं दिशं तु गच्छतु, नो जीवस्त्यज्यते[6] विधिना ॥१५४॥

—सुभाषितरत्नसन्दोहः ३६४

जीवः यह जीव नश्यतु नष्ट हो जाय, विदेशं विदेश में यातु चला जाय, धरणीतलं पृथ्वी में प्रविशतु प्रवेश कर जाय, खम् आकाश में उत्पततु उड़ जाय, (तथा) विदिशं दिशं विभिन्न दिशाओं में गच्छतु चला जाय (तथापि) विधिना विधि के द्वारा त्यज्यते न छोड़ा नहीं जाता।

सन्धि—१—च + आगमान् २—यागैः + विवदन्तु ३—वादैः + विना ४—न + एव। ५—खम् + उत्पतत्तु, ६—जीवः + त्यज्यते।

यह चार काम करो

त्यज दुर्जन-संसर्गं, भज साधु-समागमम् ।
कुरु पुण्य-महोरात्रं,[1] स्मर नित्यमनित्यताम्[2] ॥१५५॥

—चाणक्यनीतिः २-१३

दुर्जन-ससर्गं दुर्जनों का संसर्ग त्यज छोड़ो, साधु-समागमं सज्जनों का समागम भज करो, अहोरात्रं रातदिन पुण्यं पुण्य कुरु करो (तथा) अनित्यतां (संसार की) अनित्यता को नित्यं बराबर स्मर याद रक्खो ।

शिवमस्तु सर्वजगतः, परहित-निरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु शान्तिं, सर्वत्र सुखी भवतु लोकः ॥१५६॥

—मालतीमाधव

सर्वजगतः समस्त संसार का शिवं कल्याण अस्तु होवे, भूतगणाः सम्पूर्ण प्राणी पर-हित-निरताः दूसरों का हित करने में संलग्न भवन्तु होवें, दोषाः दोष (बुराइयाँ) शान्तिं शान्ति को प्रयान्तु प्राप्त हों (तथा) लोकः मनुष्य सर्वत्र सब जगह सुखी सुखी भवतु होवे ।

क्या पूछना चाहिये ?

गुणं पृच्छस्व मा रूपं, शीलं पृच्छस्व मा कुलम् ।
सिद्धिं पृच्छस्व मा विद्यां, भोगं पृच्छस्व मा धनम् ॥१५७॥

—सुभाषितरत्नभाण्डागारः

गुणं गुण को पृच्छस्व पूछो रूपं मा रूप को मत (पूछो), शीलं शील को पृच्छस्व पूछो कुलं मा कुल को मत (पूछो), सिद्धिं सिद्धि को पृच्छस्व पूछो विद्यां मा विद्या को मत (पूछो) (तथा) भोगं भोग को पृच्छस्व पूछो धनं मा धन को मत पूछो ।

सन्धि—१—पुण्यम् + अहोरात्रम्—२—नित्यम् + अनित्यताम् ।

इन्हें पवित्र करो

वपुः पवित्रीकुरु तीर्थयात्रया, चित्तं पवित्रीकुरु धर्मवाञ्छया।
वित्तं पवित्रीकुरु पात्रदानतः, कुलं पवित्रीकुरु सच्चरित्रैः ॥१५८॥
उपदेशतरङ्गिणी ४,१

तीर्थयात्रया तीर्थयात्रा के द्वारा **वपुः** शरीर को **पवित्रीकुरु** पवित्र करो, **धर्मवाञ्छया** धर्म-कार्यों के करने की इच्छा से **चित्तं** चित्त को **पवित्रीकुरु** पवित्र करो, **पात्रदानतः** सत्पात्रों को दान देने से **वित्तं** धन को **पवित्रीकुरु** पवित्र करो (तथा) **सच्चरित्रैः** अच्छे आचरणों से **कुलं** कुल को **पवित्रीकुरु** पवित्र करो।

भगवान् से पाँच प्रार्थनायें

अविनयमपनय[1] विष्णो ! दमय मनः शमय विषय-मृगतृष्णाम्।
भूतदयां विस्तारय, तारय संसार-सागरतः ॥१५९॥
—षट्पदी स्तोत्रम् १

विष्णो ! हे भगवन् ! **अविनयं** अविनय को **अपनय** दूर करो, **मनः** मन को **दमय** दबाओ, **विषय-मृगतृष्णां** विषयों की मृगतृष्णा को **शमय** शान्ति करो, **भूतदयां** प्राणियों पर दयाभाव का **विस्तारय** विस्तार करो (तथा) **संसार-सागरतः** संसाररूपी सागर से **तारय** पार करो।

क्या करो और क्या नहीं ?

धर्मं चरत माऽधर्मं,[2] सत्यं वदत माऽनृतम्[3]।
दीर्घं पश्यत मा ह्रस्वं, परं पश्यत माऽपरम्[4] ॥१६०॥

धर्मं धर्म **चरत** करो **अधर्मं** अधर्म **मा** नहीं। **सत्यं** सत्य **वदत** बोलो **अनृतं** झूठ **मा** नहीं। **दीर्घं** दूर तक **पश्यत** देखो **ह्रस्वं** समीप तक—कम दूर तक **मा** नहीं। **परं** परम पुरुष को **पश्यत** देखो **अपरं** तुच्छ (संसार) को **मा** नहीं।

सन्धि—१—अविनयम् + अपनय। २—मा + अधर्मम्, ३—मा + अनृतम्, ४—मा + अपरम्।

सात उपदेश

यज देहि प्रजा रक्ष, धर्मं समनुपालय।
अमित्रान् जहि कौन्तेय, मित्राणि परिपालय ॥१६१॥

—शान्तिपर्व, १५,५३.

कौन्तेय ! हे युधिष्ठिर यज यज्ञ करो, देहि दान करो, प्रजा रक्ष : प्रजा की रक्षा करो, धर्मं समनुपालय धर्म का पालन करो, अमित्रान् जहि शत्रुओं को मारो (तथा) मित्राणि मित्रों का परिपालय पालन करो।

ये सज्जनों के बारह लक्षण हैं ?

तृष्णां छिन्धि, भज क्षमां, जहि मदं, पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि[1] साधुपदवीं, सेवस्व विद्वज्जनान्।
मान्यान् मानय, विद्विषोऽप्यनुनय[2], ह्याच्छादय[3] स्वान् गुणान्
कीर्तिं पालय दुःखिते कुरु दयामेतत्[4] सतां लक्षणम् ॥१६२॥

—नीतिशतकम् ७८.

तृष्णां तृष्णा को छिन्धि काटो, क्षमां क्षमा को भज धारण करो, मदं मद को—अभिमान को जहि छोडो, पापे पाप में रतिं प्रेम मा मत कृथाः करो, सत्यं सत्य ब्रूहि बोलो, साधुपदवीं सज्जनों के मार्ग पर अनुयाहि चलो, विद्वज्जनान् विद्वानों की सेवस्व सेवा करो, मान्यान् माननीय पुरुषों का मानय संमान करो, विद्विषः शत्रुओं से अपि भी अनुनय अनुनय-विनयपूर्ण व्यवहार रखो, स्वान् अपने गुणान् गुणों को आच्छादय छिपाओ, कीर्तिं यश को पालय बचाये रहो, (तथा) दुःखिते दुखी लोगों के ऊपर दयां दया कुरु करो (क्योंकि) एतत् यह सतां सज्जन पुरुषों का लक्षणं लक्षण है।

सन्धि—१—ब्रूहि + अनुयाहि। २—विद्विषः + अपि + अनुनय। ३—हि + आच्छादय ४—दयाम् + एतत्।

इसे एक बार भी तो सोचो

अश्नीत पिबत खादत, जागृत संविशत चलत तिष्ठत वा ।
